श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकियरामायणम्

## ॥ सुन्दरकाण्डम् ॥

## एकोनत्रिंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीसीतारामाभ्यां नमः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## एकोनत्रिंशः सर्गः

*सीतायाः शुभशकुनानि*

तथागतां तां व्यथितामनिन्दितां
    व्यतीतहर्षां परिदीनमानसाम्।
शुभां निमित्तानि शुभानि भेजिरे
    नरं श्रिया जुष्टमिवोपसेविनः॥ ५.२९.१ ॥

तस्याः शुभं वाममरालपक्ष्म-
    राज्यावृतं कृष्णविशालशुक्लम्।
प्रास्पन्दतैकं नयनं सुकेश्या
    मीनाहतं पद्ममिवाभिताम्रम्॥ ५.२९.२ ॥

भुजश्च चार्वञ्चितवृत्तपीनः
    परार्ध्यकालागुरुचन्दनार्हः।
अनुत्तमेनाध्युषितः प्रियेण
    चिरेण वामः समवेपताशु॥ ५.२९.३ ॥

गजेन्द्रहस्तप्रतिमश्च पीन-
    स्तयोर्द्वयोः संहतयोस्तु जातः।
प्रस्पन्दमानः पुनरूरुरस्या
    रामं पुरस्तात् स्थितमाचचक्षे॥ ५.२९.४ ॥

शुभं पुनर्हेमसमानवर्ण-
    मीषद्रजोध्वस्तमिवातुलाक्ष्याः।
वासः स्थितायाः शिखराग्रदन्त्याः
    किञ्चित् परिस्रंसत चारुगात्र्याः॥ ५.२९.५ ॥

www.prapatti.com

एतैर्निमित्तैरपरैश्च सुभ्रूः
　　सञ्चोदिता प्रागपि साधुसिद्धैः।
वातातपक्लान्तमिव प्रणष्टं
　　वर्षेण बीजं प्रतिसञ्जहर्ष॥ ५.२९.६ ॥

तस्याः पुनर्बिम्बफलोपमोष्ठं
　　स्वक्षिभ्रुकेशान्तमरालपक्ष्म।
वक्त्रं बभासे सितशुक्लदंष्ट्रं
　　राहोर्मुखाच्चन्द्र इव प्रमुक्तः॥ ५.२९.७ ॥

सा वीतशोका व्यपनीततन्द्रा
　　शान्तज्वरा हर्षविबुद्धसत्त्वा।
अशोभतार्या वदनेन शुक्ले
　　शीतांशुना रात्रिरिवोदितेन॥ ५.२९.८ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनत्रिंशः सर्गः॥

www.prapatti.com